प्रस्थानकालमारभ्य "हिजरि" इति प्रसिद्धो हायनः प्रचलितः। अयन्तु चान्द्रमानेन परिगणितो भवति। अतः प्रायशः सौरसप्तनवतितमवर्षैरस्य शततमा वत्सरा भवेयुः॥

पञ्चाशीत्यूर्द्ध्वपञ्चशताधिकचतुःसहस्रपरिमितेषु कलेरतीताब्देषु (४५८५) सप्ताधिकचतुर्द्दशशतपरिमिते (१४०७) च शकाब्दे प्रचरति फाल्गुनीयोनविंशदिवसे शुक्रवारे पूर्णिमायां भगवांश्चैतन्यदेवः प्रादुर्बभूव। अस्य जन्मदिनमारभ्य चैतन्याब्दः प्रचलितः॥)

अस्मिन् युगे धर्म्म एकपादः। अधर्म्मस्त्रिपादः। आयुः शतवर्षाणि। अवतारः श्रीकृष्णः। तद्युगशेषे पापिनां विनाशाय भगवद्दशमावतारः कल्किर्भविष्यति। तद्युगधर्म्मो यथा।

"कलौ तु धर्म्मपादानां तूर्य्यांशोऽधर्म्महेतुभिः।
एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति॥
तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः।
दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः"॥
"यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम्।
शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः॥
यस्मात् क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः।
कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः॥
दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः।
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः॥
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः।
तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः॥
ह्रस्वकाया महाहारा बह्वपत्या गतह्रियः।
शश्वत्कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः॥
पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः।
अनापद्यपि मंस्यन्ते वार्त्तां साधुजुगुप्सिताम्॥
पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम्।
भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः॥
पितॄन् भ्रातॄन् सुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः
ननान्दृश्यालसम्वादा दीनाः स्त्रैणाः कलौ नराः॥
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः।
धर्म्मं वक्ष्यन्त्यधर्म्मज्ञा अधिरुह्योत्तमासनम्॥
नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्षिताः।
निरन्ने भूतले राजन्ननावृष्टिभयातुराः॥
वासोऽन्नपानशयनव्यवायस्नानभूषणैः।
हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः॥
कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः।
त्यक्ष्यन्ति हि प्रियान् प्राणान् हनिष्यन्ति स्वकानपि॥
न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि।
पुत्त्रान् भार्य्यां च कुलजां क्षुद्राः शिश्नोदरम्भराः॥
कलौ न राजन् जगतां परं गुरुं
त्रिलोकनाथानतपादपङ्कजम्।
प्रायेण मर्त्या भगवन्तमच्युतं
यक्ष्यन्ति पाषण्डविभिन्नचेतसः"॥ * ॥

कलिकृतदोषविनाशोपायः। यथा,

"यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वा विवशो गृणन् पुमान्।
विमुक्तकर्म्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः॥
पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान्।
सर्व्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः॥
श्रुतः संकीर्त्तितो ध्यातः पूजितश्चादृतोऽपि वा।
नृणां क्षिणोति भगवान् हृत्स्थो जन्मायुताशुभम्॥
यथा हेम्नि स्थितो वह्निर्दुर्व्वर्णं हन्ति धातुजम्।
एवमात्मगतो विष्णुर्योगिनामशुभाशयम्॥
विद्यातपःप्राणनिरोधमैत्री
तीर्थाभिषेकव्रतदानजप्यैः।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा
यथा हृदिस्थे भगवत्यनन्ते॥
तस्मात् सर्व्वात्मना राजन् हृदिस्थं कुरु केशवम्।
म्रियमाणो ह्यवहितस्ततो याहि परां गतिम्"॥
"कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्"॥

इति श्रीभागवते महापुराणे १२। ३ अध्यायः॥ *॥

तद्युगशेषधर्म्माः यथोक्तास्तत्रैव १२।१।३६-४७॥

"सौराष्ट्रावन्त्याभीराश्च शूरा अर्व्वुदमालवाः।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः॥
सिन्धोस्तटं चन्द्रभागां कौन्तीं काश्मीरमण्डलम्।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छा अब्रह्मवर्च्चसः॥
तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः।
एतेऽधर्म्मानृतपराः फल्गुदास्तीव्रमन्यवः॥
स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः।
उदितास्तमितप्राया अल्पसत्वाल्पकायुषः॥
असंस्कृताः क्रियाहीना रजसा तमसा वृताः।
प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः॥
तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः।
अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीड़िताः"॥

तत्रैव १२।२।१-१६।

"ततश्चानुदिनं धर्म्मः सत्यं शौचं क्षमा दया।
कालेन बलिना राजन् नङ्क्ष्यत्यायुर्ब्बलं स्मृतिः॥
वित्तमेव कलौ नृणां जन्माचारगुणोदयः।
धर्म्मन्यायव्यवस्थायां कारणं बलमेव हि॥
दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यवहारिके।
स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि॥
लिङ्गमेवाश्रमख्यातावन्योन्यापत्तिकारणम्।
अवृत्त्या न्यायदौर्ब्बल्यं पाण्डित्ये चापलं वचः॥
अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव हि।
स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम्॥
दूरे वार्य्ययनं तीर्थं लावण्ये केशधारणम्।
उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि॥
दाक्ष्ये कुटुम्बभरणं यशोऽर्थे धर्म्मसेवनम्।
एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले।
ब्रह्मविट्क्षत्त्रशूद्राणां यो बली भविता नृपः॥
प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्म्मभिः।
आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम्॥
शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः।
अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीड़िताः॥
शीतवातातपप्रावृड्हिमैरन्योऽन्यतः प्रजाः।
क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया॥
त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम्।
क्षीयमाणेषु देहेषु देहिनां कलिदोषतः।
वर्णाश्रमवतां धर्म्मे नष्टे वेदपथे नृणाम्॥
पाषण्डप्रचुरे धर्म्मे दस्युप्रायेषु राजसु।
चौर्य्यानृतवृथाहिंसानानावृत्तिषु वै नृषु॥
शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु।
गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु॥
अणुप्रायास्वोषधीषु शमीप्रायेषु स्थाणुषु।
विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु॥
इत्थं कलौ गतप्राये जनेषु खरधर्म्मिषु।
धर्म्मत्राणाय सत्वेन भगवानवतरिष्यति"॥

(देवगन्धर्व्वविशेषः। स तु कश्यपात् दक्षकन्यायां मुनौ जातः। यथा, महाभारते १।६५।४४।

"तथा शालिशिरा राजन् पर्ज्जन्यश्च चतुर्द्दश।
कलिः पञ्चदशस्तेषां नारदश्चैव षोड़शः"॥

शिवः। यथा महाभारते।१३।१७।७८।

"दम्भोह्यदम्भो वैदम्भो वश्यो वशकरः कलिः"॥)

कलिः, स्त्री, (कलयति ईषत्प्रकाशतेउद्भिद्यते वा कल्+ततः इन्।) कलिका। इति मेदिनी॥

कलिकः, पुं, (कलो मन्दगम्भीरध्वनिरस्यास्ति। कल+मत्वर्थे ठन्।) क्रौञ्चपक्षी। इति शब्दरत्नावली॥

कलिका, स्त्री, (कलिरेव। स्वार्थे कन् टाप् च।) अस्फुटितपुष्पम्। तत्पर्य्यायः। कोरकः २। इत्यमरः।२।४।१६॥ कलिः ३ कली ४। कोरकम्। ५ इति तट्टीका॥ (यथा, साहित्यदर्पणे ३। १६८।

"मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः"॥)

वीणामूलम्। इति हेमचन्द्रः॥ पदसन्ततियुक्तरचनाविशेषः। तद्विवरणम् यथा,—

"स्युर्म्महाकलिकारम्भे श्लोकास्तु युगशः स्मृताः।
अन्यासां कलिकानान्तु भवन्त्येकैकशो हि ते॥
पूर्त्तौ द्वौ कलिकाभिस्तु विरुदास्तुल्यसङ्ख्यकाः"॥*॥

कलिकालक्षणम्।

"कला नाम भवेत्तालनियता पदसन्ततिः।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः।
कलिका चण्डवृत्ताख्या द्विगादिगणवृत्तका।
तथा त्रिभङ्गी वृत्ताख्या मध्या मिश्रा च केवला"॥

चण्डवृत्ते दशधा संयुक्तवर्णाः।

"अत्र संयुक्तवर्णानां नियमो दशधा च ते।
मधुरं श्लिष्टविश्लिष्टशिथिलक्रादिनस्त्वमी॥
भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दर्श्यन्ते स्फुटं यथा।
ह्रस्वान्मधुरसंयोगाः शङ्कराङ्कुशकिङ्कराः॥
तस्मात्तु श्लिष्टसंयुक्ता दर्पकर्परसर्पवत्।
ततो विश्लिष्टसंयुक्ता भक्तकल्याणचिन्तयः॥
तथा शिथिलसंयुक्ताः पश्य कश्यप वश्यवत्।
प्रोक्ता क्रादियुता मह्यं सह्यं गुह्यं प्रसह्यवत्॥
गर्व्वादीन् क्रादिसंयुक्तभेदान् केचित् समूचिरे।
दीर्घात्तु क्राङ्ककार्पासं काव्यं वैश्यश्च वाह्यकम्"॥

कलापरिमाणमुक्तम्।